# Shri Ganesha Stuti Rishiputrakrita

# ઋષિપુત્રાકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Shri Ganesha Stuti Rishiputrakrita

File name : gaNeshastutiHRRiShiputrAkRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM dvitIyaH khaNDaH | adhyAyaH 7 | 2.7 5-21||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 5, 2024

*sanskritdocuments.org*

# ઋષિપુત્રાકૃતા શ્રીગણેશસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
ઋષિપુત્રા ઊચુઃ ।
નમસ્તે વક્રતુણ્ડાય ભક્તરક્ષકરૂપિણે ।
બ્રહ્માકારાય દેવાય બ્રહ્મભૂતાય તે નમઃ ॥ ૫॥
મનોવાગતિરૂપાય મનોવાગ્ગમ્યમૂર્તયે ।
યોગાકારાય યોગાય યોગિને તે નમો નમઃ ॥ ૬॥
નિરાકારાય વિઘ્નેશ ભક્તવિઘ્નનિવારક ।
શાન્તિરૂપાય સર્વત્ર શાન્તિદાય નમો નમઃ ॥ ૭॥
સૃષ્ટિરક્ષણસંહારકારિણે તે નમો નમઃ ।
સર્વપૂજ્યાય સર્વાય નમઃ સર્વાદિમૂર્તયે ॥ ૮॥
માયાવિકારહીનાય માયિને મોહદાયિને ।
માયાધારાય માયાયાશ્ચાલકાય નમો નમઃ ॥ ૯॥
અનન્તવિભયાયૈવાનન્તોદારપરાક્રમ ।
અનન્તાનનહસ્તાય સર્વસાક્ષિન્નમોઽસ્તુ તે ॥ ૧૦॥
વેદાન્તાગમ્યરૂપસ્ત્વં દૃષ્ટો વૈ ભાગ્યગૌરવાત્ ।
સ્તુતિં કર્તું સમર્થા ન વયં તવ ગજાનન ॥ ૧૧॥
ધન્યો નો જનકો દેવ વયં ધન્યતમા વિભો ।
વિદ્યા વ્રતં તપો મન્ત્રોઽસ્માકં ગણપદર્શનાત્ ॥ ૧૨॥
વરદશ્ચેદેકદન્ત ભક્તિં દેહિ દૃઢાં ત્વયિ ।
યયા માયામયો મોહો નશ્યેદ્વૈ વરદ પ્રભો ॥ ૧૩॥
સ્વસ્વકાર્યેષુ સામર્થ્યં દેહિ દેવ ગજાનન ।
યદ્યદિચ્છામહે તત્તત્ સફલં ભવતુ પ્રભો ॥ ૧૪॥
એવમુક્ત્વા પૂજયન્ત ઉપચારૈરનેકશઃ ।
પ્રણેમુર્ભક્તિયુક્તાસ્તં સરોમાઞ્ચા બભૂવિરે ॥ ૧૫॥
તતસ્તાનબ્રવીદ્દેવો ભવતાં યચ્ચિકીર્ષિતમ્ ।

તદેવ સફલં સર્વં ભવિષ્યતિ ન સંશયઃ ॥ ૧૬॥
(ફલશ્રુતિઃ)
ભક્તિર્મદીયપાદેષુ ભવિષ્યતિ સુખપ્રદા ।
સામર્થ્યં સ્વસ્વકાર્યેષુ દૃઢા ખ્યાતિર્ભવિષ્યતિ ॥ ૧૭॥
ભવત્કૃતમિદં સ્તોત્રં સર્વસિદ્ધિકરં ભવેત્ ।
યઃ શૃણોતિ નરો ભક્ત્યા પઠેદ્વૈ તસ્ય સિદ્ધિદમ્ ॥ ૧૮॥
એકવિંશતિવારં ચ પઠેત્તાવદ્દિનાનિ યઃ ।
સ સદ્યઃ ફલમાપ્નોતિ ચિત્તેપ્સિતમસંશયમ્ ॥ ૧૯॥
એવમુક્ત્વા ગણાધીશસ્તત્રૈવાન્તરધીયત ।
તે ચ સ્વસ્વગૃહે સર્વે યયુર્હર્ષસમન્વિતાઃ ॥ ૨૦॥
સ્ત્રિયશ્ચ પુરુષાઃ સર્વે દક્ષકન્યા સમુદ્ભવાઃ ।
સુખિનઃ સ્વસ્વકાર્યેષુ બભૂવુર્જ્ઞાનસંયુતાઃ ॥ ૨૧॥

ઇતિ ઋષિપુત્રાકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં દ્વિતીયઃ ખણ્ડઃ । અધ્યાયઃ ૭ । ૨.૭ ૫-૨૧॥

- .. mudgalapurANaM dvitIyaH khaNDaH . adhyAyaH 7 . 2.7 5-21..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganesha Stuti Rishiputrakrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*